1.1



## वाग्वर्धिनीपरिषदः उद्घाटनसत्रम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये ऐषमः छात्राणां वाक्कौशलवर्धनाय वाग्वर्धिनीपरिषदः उद्घाटनसत्रं २७.०१.२०२१ तमे दिनाङ्के प्रावर्तत। अस्य उद्घाटनसत्रस्य अध्यक्षः आसीत् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः। प्रभासज्योतिः इति शैक्षणिकभवनस्य सभागारे समायोजिते अस्मिन् उद्घाटनकार्यक्रमे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार पटेलः, प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, वाग्वर्धिनीपरिषदः अध्यक्षः प्रो. विनोदकुमारः झा, सर्वेऽपि प्राध्यापकाः छात्राश्च उपस्थिताः आसन्। अस्य उद्घाटनसत्रस्य प्रसारणं वेबेक्समाध्यमेन अपि अभूत् यत्र छात्राः संलग्नाः आसन्।

कार्यक्रमस्य आरम्भः दीपप्राकट्येन अभूत् यत्र वेदवेदाङ्गसङ्कायाध्यक्षः डॉ. शत्रुघ्नपाणिग्राही वैदिकं मङ्गलाचरणम् अकरोत्। तदनु अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार पटेलः मञ्चस्थमहानुभावानां परिचयपुरस्सरं शाब्दिकं स्वागतम् अकरोत्। अस्याः वाग्वर्धिन्याः परिषदः प्रास्ताविकं नैकोदाहरणपूर्वकं प्रो. विनोदकुमारः झा प्रास्तौत्। अस्मिन् अवसरे विश्वविद्यालयेन छात्रान् उद्दिश्य क्रियमाणकार्यविषये कुलसचिवः डॉ. दशरथ जादवः स्वकीये उद्बोधने अवादीत्। उद्घाटनसत्रस्य अध्यक्षेण मान्यकुलपतिना प्रो. गोपबन्धुमिश्रवर्येण स्वीयाध्यक्ष्ये उद्बोधने अवादि यत् वाचः संवर्धनाय परिषदः आवश्यकता अस्ति। छात्रेषु वाग्वर्धनाय इयं परिषत् भूयिष्ठा वर्तते। अस्याः परिषदः लक्ष्यं संस्कृतम् अस्ति, साधनमपि संस्कृतम् अस्तीति। कार्यक्रमान्ते प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या स्ववाग्विलासवचोभिः मधुरया रीत्या धन्यताविष्कृतिं प्राकटयत्। अस्य उद्घाटनकार्यक्रमस्य संयोजनं सत्रसञ्चालनं च वाग्वर्धिनीपरिषदः सभ्यसचिवः दर्शनप्राध्यापकः डॉ. जानकीशरण आचार्यः अकरोत्।



वाग्वर्धिनीपरिषदः उद्घाटानसत्रे दीपप्रज्वालनम्



वाग्वर्धिनीपरिषदः उद्घाटानसत्रे उपस्थिताः अध्यापकाः छात्राः च



उद्घाटानसत्रे आध्यक्ष्यं भाषमाणः माननीयः कुलपतिवर्यः

अंक- 27, जनवरी-मार्च- 2021, पृष्ठ संख्या-14

2.1





## संस्कृतसप्ताहोत्सवः

प्रतिवर्षमिव अस्मिन् वर्षे अपि श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा संस्कृतसप्ताहमहोत्सवस्य आयोजनम् ३१ तः ०६/०७/२०२० तमेषु दिनाङ्केषु जातम्। अस्य सप्ताहोत्सवस्य उद्घाटनसत्रं ३१/०७/२०२० तमे दिनाङ्के शुक्रवासरे प्रातः सार्धदशवादने अभवत्। उद्घाटनसत्रे प्रास्ताविककथनं महानुभावानां स्वागतं च प्राचार्यः नरेन्द्रकुमारः पण्ड्यामहोदयः अकरोत्। तत्र क्रमेण श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा प्रकाशितस्य १. भाष्यपरम्परा ज्ञानप्रवाहश्च, २. काश्मीरशास्त्रदर्शनम् एवञ्च भवानीसहस्रनामनिरूपणम् इति पुस्तकद्वयस्य लोकार्पणं महानुभावानां करकमलैः जातम्।



संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमः

संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रे पुस्तकविमोचनम्

संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रस्य Live प्रसारणम्

अस्मिन् उद्घाटनसत्रे मुख्यवक्तृरूपेण सौभाग्येन प्राप्तः संस्कृत-संवर्धन-प्रतिष्ठानस्य न्यासी पद्मश्रीः चमूकृष्णशास्त्रिवर्यः। मान्यः शास्त्रिवर्यः संस्कृत-प्रसाराय श्रमं करोति इति विज्ञातप्रायम्। तस्य भाषणमपि सर्वथा प्रासङ्गिकम् अनुकरणीयं च भवति इत्यपि प्रसिद्धमेव। इत्थमस्मिन् अवसरेऽपि श्रीमान् शास्त्रिवर्यः संस्कृतसेवायै नूतनान् उपायान् प्रदर्शितवान्। संस्कृतशिक्षकाः कथं संस्कृतं प्रसारयितुं शक्ताः इति विषयेऽपि विविधान् उपायान् सः अवदत्। आधुनिकः कालः तकनीकिकालः, यन्त्रकालः वर्तते, विविधानां यन्त्राणां तकनीकीनां च उपयोगेन संस्कृतकार्यं कथं भवितुं शक्नोति इति शास्त्रिमहोदयेन अवादि।


कार्यक्रमे अस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्यः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षत्वेन उपस्थाय संस्कृतसप्ताहस्य, वर्तमानसमये संस्कृतस्य च महत्त्वम् अवदत्। कार्यक्रमस्य अन्ते कुलसचिवः डॉ दशरथ जादवः सर्वेषां कृते धन्यवादवचांसि प्रकटितवान्।

अस्य उद्घाटनकार्यक्रमस्य संचालनं साहित्यविभागस्य सहायकाचार्येण श्रीगिरधरभट्टमहोदयेन अक्रियत। एतस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एवं विश्वविद्यालयसंलग्नमहाविद्यालयानां प्राचार्याः, प्राध्यापकाः, कर्मचारिणः, अधिकारिणः, छात्राः च ऑनलाइन वेबेक्स माध्यमेन भागं गृहीतवन्तः। एतस्य उद्घाटनकार्यक्रमस्य फेसबुक माध्यमेन लाइव प्रसारणमपि जातम्। तत्रापि प्रायः सप्तशतं जनाः अमुं कार्यक्रमं दृष्ट्वा लाभान्विताः समभवन्।

अस्मिन् सप्ताहोत्सवे विविधाः स्पर्धाः कार्यक्रमाः च आयोजिताः आसन्। स्पर्धानाम् आयोजनं विश्वविद्यालयस्य अध्यापकैः कृतमासीत्। संस्कृतप्रचाराभियानम् अपि अस्मिन् सप्ताहे आयोजितम्। प्रचाराभियानस्य अङ्गतया विडियो अभियानम् तथा सूक्ति-अभियानम् आचरितम्। रक्षाबन्धनस्य दिवसः संस्कृतदिवसः अस्ति अतः तस्मिन् दिने ३.८.२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा विडियो अभियानस्य अङ्गतया महानुभावैः, संस्कृतमहाविद्यालयप्राध्यापकैः, विश्वविद्यालयकर्मचारिभिः, पूर्वच्छात्रैः, संस्कृतानुरागिभिः च लघु-चलच्चित्राणि निर्मितानि आसन् तेषां सोशियल मिडिया माध्यमेन प्रचारः कृतः। आहत्य १४० जनाः तादृशानि चलच्चित्राणि प्रेषितवन्तः। तेषु गुजरातराज्यस्य माननीयः शिक्षणमन्त्री, स्वामि-श्रुतिप्रकाशदासः, प्रो. चेतन त्रिवेदी, प्रो. नितिन पेथाणी इत्यादयः महानुभावाः अपि आसन्। विश्वविद्यालयस्य प्रायः सर्वेऽपि कर्मचारिणः स्वस्य, स्वकुटुम्बस्य, स्वबान्धवानां च चलच्चित्राणि प्रेषितवन्तः। एतेषां चलच्चित्राणां सम्पादनं कृत्वा तत्र विश्वविद्यालयस्य लोगो समारोप्य एतानि तेभ्यः प्रत्यर्पितानि। सर्वैः अपि सामाजिकमाध्यमैः तानि प्रसारितानि। विश्वविद्यालयस्य फेस-बुक-पृष्ठद्वारा एतेषु उपचारिः चलच्चित्राणि प्रसारितानि। फेसबुकद्वारा अस्मद्विश्वविद्यालयद्वारा जायमानम् एतद् अभियानं वीक्ष्य अन्येऽपि नैकैः संस्कृतानुरागिणः प्रेरिताः। तैः अपि एतादृशाः यत्नाः अनुष्ठिताः। एतेन प्रकारेण अन्यूनं २५००० जनान् प्रति संस्कृत-दिनस्य सन्देशः गतः। विडियो-अभियानस्य संयोजनम् डॉ.दीपेशः कतिरा अकरोत्।

प्रचाराभियानस्य अङ्गतया एव संस्कृतसूक्ति-अभियानम् अभवत्। सूक्त्यभियाने फेसबुक एवं ट्वीटरमाध्यमेन संस्कृतसाहित्यस्य प्रसिद्धसूक्तिषु प्रतिदिनम् १० सूक्तीनां प्रचारः जातः। सूक्ति-अभियानस्य संकलनं श्रीगिरधरभट्टः अकरोत्।

2.2





आसप्ताहं वर्तमानसमये संस्कृतस्य का प्रासङ्गिकता इति विषयमाधाय वृत्तपत्रेषु प्रासङ्गिकानां संस्कृत-विषयक-विभिन्नानां सल्लेखानां प्रकाशनं जातम्। एते लेखाः कुलपति-प्राचार्य-अध्यक्षादिभिः लिखिताः आसन्। वृत्तपत्रेषु प्रकाशनाय डॉ.आशा माढक तथा कु.अपूर्वा अग्रवाल संयोजनम् अकुरुताम्। एवं विविधं प्रचाराभियानम् अभवत्।

संस्कृतसप्ताहे प्रतिदिनं विविधाः स्पर्धाः अपि आयोजिताः आसन्। एतासाम् आयोजनं स्तरद्वये कृतम् आसीत् – विद्यालयस्तरे महाविद्यालयस्तरे च तद्विवरणम् एवम् अस्ति -

| दिनाङ्कः | स्पर्धा | भागग्राहिणां सङ्ख्या |
|---|---|---|
| ०१/०८/२०२० | कथाकथनस्पर्धा | १४ |
| ३१/०७/२०२० | स्तोत्रकण्ठपाठस्पर्धा | ३४ |
| ०४/०८/२०२० | एकलसंस्कृतगीतस्पर्धा | २३ |
| ०५/०८/२०२० | वक्तृत्वस्पर्धा | १८ |
| ३१ तः ०६/०८/२०२० | ऑनलाइन प्रश्नोत्तरी | २०० |

एवम् आसप्ताहं विविधकार्यक्रमाः श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा संस्कृतसप्ताहावसरे आचरिताः। एतस्य ऑनलाईन-संस्कृतसप्ताहोत्सवस्य समापनकार्यक्रमः ०६/०८/२०२० तमे दिनाङ्के गुरुवासरे प्रातः सार्धदशवादने समायोजितः। कार्यक्रमस्य आरम्भः मङ्गलाचरणेन कुलगीतेन च अभवत्। अस्मिन्नवसरे अनुस्नातकविभागस्य अध्यक्षः डॉ॰ ललितपटेलमहाभागः महानुभावानां परिचयं प्रदाय स्वागतम् अकरोत्। तदनु डॉ॰ दीपेशकतिरामहोदयः संस्कृतसप्ताहस्य वृत्तकथनमकरोत्।

कार्यक्रमे अस्मिन् मुख्यातिथिरूपेण श्रीगोविंदगुरुविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. प्रतापसिंहचौहाणमहोदयः अस्माभिः सद्भाग्येन सम्प्राप्तः। सन्दर्भे अस्मिन् तेन प्रसङ्गोचितम् उद्बोधनमपि कृतमासीत्। तत्र समापनकार्यक्रमे विश्वविद्यालयस्य माननीयः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षत्वेन उपस्थाय कार्यक्रमस्य सफलतायै सर्वेभ्यः आयोजकेभ्यः आशीर्वचांसि प्रादात्। अस्मिन् समापनावसरे श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा प्रकाशितस्य १. भारतीयदर्शनसिद्धान्तप्रभा, २. संस्कृतवाङ्मये नगररचना, ३. वाक्यार्थज्योतिः इति ग्रन्थत्रयस्य लोकार्पणं महानुभावानां करकमलैः जातम्। नूतनग्रन्थानां परिचयः कु॰ अपूर्वा अग्रवालमहोदयया प्रदीयत। डॉ॰ आशा माढकमहाभागया विभिन्नस्पर्धानां विजेतॄणां नामोद्घोषणमकारि। अन्ते कार्यक्रमस्य समाप्ते प्राचार्यः डॉ. नरेंद्रकुमार पण्ड्या महोदयः सर्वेषां कृते धन्यवादवचांसि प्रकटितवान्। सम्पूर्णकार्यक्रमस्य संचालनं ज्योतिषविभागस्य सहायकाचार्यः श्रीनित्यानन्दओझामहोदयः अकरोत्। कार्यक्रमस्य समापनं पूर्णतामन्त्रेण अभवत्।

ऑनलाईन वेबेक्स माध्यमेन समायोजिते समापनकार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एवं विश्वविद्यालयसंलग्न महाविद्यालयानां प्राचार्याः, प्राध्यापकाः, कर्मचारिणः, अधिकारिणः, मुख्यातिथिमहोदयाः तथा च सर्वासु स्पर्धासु विजेतारः छात्राः उपस्थिताः आसन्। कार्यक्रमस्यास्य फेसबुक माध्यमेन लाईव प्रसारणमपि जातम्। तत्रापि बहवः जनाः कार्यक्रममममुं दृष्टवन्तः। सम्पूर्णकार्यक्रमस्य विवरणं वृत्तं च दैनिकसमाचारपत्रैः – दैनिकसमाचार, गुजरातसमाचार, फुलछाब इत्यादिभिः प्रकाशितम् आसीत्। एवम् अयम् अद्भुतः संस्कृतसप्ताहोत्सवः विश्वविद्यालयेन समायोजितः। सम्पूर्ण-सप्ताहोत्सवस्य संयोजकाः डॉ. दीपेशः कतिरा, डॉ.आशा माढकः, श्रीजिगरभट्टः, श्रीविपुलः जादवः, श्रीनित्यानन्दः ओझा, कु. अपूर्वा अग्रवालः च आसन्।

संयुक्तांक- 25-26, जुलाई-दिसम्बर- 2020, पृष्ठ संख्या-10

3.1

## हिन्दीदिवसम् उपलक्ष्य वक्तृत्वस्पर्धा समयोजिता



सरदार वल्लभभाई पटेल वक्तृत्वस्पर्धायाः एकं चित्रम्

सरदार वल्लभभाई पटेल वकृत्वस्पर्धा एवं जेठालाल जोशी हिंदीवक्तृत्वस्पर्धा ऑनलाइन आयोजिता आसीत्। अस्यां वक्तृत्वस्पर्धायां श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य आचार्यप्रथमवर्षस्य साहित्यविभागल्य छात्रा मकवाणा सीमा राजेशभाई द्वितीयं स्थानं प्राप्तवती। तदर्थं माननीयः कुलपतिवर्यः, कुलसचिववर्यः, अध्यापकाश्च अस्यै छात्रायै अभिनन्दनानि प्रदत्तवन्तः। पुरस्कारं प्राप्तवद्भ्यः सर्वेभ्यः छात्रेभ्यः विश्वविद्यालयपक्षतः हार्दाः शुभकामनाः प्रदीयन्ते।

सोमज्योतिः अंक- 27, जनवरी-मार्च- 2021, पृष्ठ संख्या- 24

3.2



केन्द्रीय हिन्दी निदेशालय, नई दिल्ली भारत सरकार के सहयोग से

# गुजरात प्रान्तीय राष्ट्रभाषा प्रचार समिति

## एवं

# मे. ब. पटेल राष्ट्रभाषा महाविद्यालय

के संयुक्त तत्वावधान में आयोजित

## अखिल गुजरात हिन्दी निबंध प्रतियोगिता

## प्रमाणपत्र

कुमार/कुमारी रादडिया रविकुमार मनसुखभाई

ने अखिल गुजरात हिन्दी निबंध लेखन प्रतियोगिता में अपना निबंध प्रस्तुत किया।

एतदर्थ उनको यह प्रमाणपत्र दिया जाता है।

नरेन्द्र जोषी
मंत्री-संचालक

राष्ट्रभाषा हिन्दी भवन
नगरी अस्पताल के पास, एलिसब्रिज, अहमदाबाद.

दिनांक : २१/३/२०२१

ई-मेल : rashtrabhashahindibhavan@gmail.com

## 3.3


केन्द्रीय हिन्दी निदेशालय, नई दिल्ली भारत सरकार के सहयोग से

गुजरात प्रान्तीय राष्ट्रभाषा प्रचार समिति

एवं

मे. ब. पटेल राष्ट्रभाषा महाविद्यालय

के संयुक्त तत्वावधान में आयोजित

अखिल गुजरात हिन्दी निबंध प्रतियोगिता

प्रमाणपत्र

कुमार/कुमारी महेता कपिलकुमार देपशंकर

ने अखिल गुजरात हिन्दी निबंध लेखन प्रतियोगिता में अपना निबंध प्रस्तुत किया।

एतदर्थ उनको यह प्रमाणपत्र दिया जाता है।

राष्ट्रभाषा हिन्दी भवन
नगरी अस्पताल के पास, एलिसब्रिज, अहमदाबाद.

नरेन्द्र जोषी
मंत्री-संचालक

दिनांक : २१/३/२०२१

ई-मेल : rashtrabhashahindibhavan@gmail.com

3.4

# गुजरात प्रान्तीय राष्ट्रभाषा प्रचार समिति

राष्ट्रभाषा हिन्दी भवन, नगरी अस्पताल के पास, एलिसब्रिज, अहमदाबाद-३८०००६



## सरदार वल्लभभाई पटेल विजयपद्म वक्तृत्व स्पर्धा २०२१

श्री दवे नील जगदीशभाई (श्री सोमनाथ संस्कृत युनिवर्सिटी)

दिनांक १४ मार्च २०२१, रविवार

को आयोजित **विजयपद्म वक्तृत्व स्पर्धा** में सम्मिलित हुए।

उस उपलक्ष्य में यह प्रमाणपत्र प्रदान किया जाता है।

समारोह के अध्यक्ष

N. J. Dave

मंत्री-संचालक
गुजरात प्रा.रा.प्र. समिति

दिनांक : १४-३-२०२१

3.5

# गुजरात प्रान्तीय राष्ट्रभाषा प्रचार समिति

राष्ट्रभाषा हिन्दी भवन, नगरी अस्पताल के पास, एलिसब्रिज, अहमदाबाद-३८०००६



## सरदार वल्लभभाई पटेल विजयपद्म वक्तृत्व स्पर्धा २०२१

**सुश्री सीमा मकवाना**

श्री सोमनाथ संस्कृत महाविद्यालय, वेरावल

दिनांक १४ मार्च २०२१, रविवार

को आयोजित **विजयपद्म वक्तृत्व स्पर्धा** में

**द्वितीय स्थान**

प्राप्त करने के उपलक्ष्य में यह प्रमाणपत्र प्रदान किया जाता है।

समारोह के अध्यक्ष

मंत्री-संचालक
गुजरात प्रा.रा.प्र. समिति

दिनांक : १४-३-२०२१

3.6

# गुजरात प्रान्तीय राष्ट्रभाषा प्रचार समिति

दिनांक 14-3-21

वाउचर नं ____________

श्री आंतर कोलेज वक्तृत्व स्पर्धा ____________ खाते जमा / उधार

लेनेवाले का नाम ____________


| विवरण | रु. | पै. |
|---|---|---|
| द्वितीय विजेता | 1000 | |
| रुपये (शब्दो में) एक हजार पूरा — कुल | 1000- | |

मंत्री /ट्रस्टी

हिसाबनीस

प्राप्तकर्ता

3.7



3.8

# अपूर्ण खोज

(राजेन्द्र पटेल की प्रतिनिधि कहानियाँ)



संपादक : दक्षा पटेल

3.9

## वादविवादस्पर्धा






वादविवादस्पर्धायां प्रतिभागी छात्रः रविः रादडीया

वादविवादस्पर्धायां प्रतिभागी छात्रः निकुञ्जः दवे

वर्ल्ड ऑफ वैली एवं महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयस्य च संयुक्ततत्त्वावधाने वादविवादप्रतियोगिता २९/१०/२०२० तमे दिनाङ्के प्रातः १०.३० वादनतः ०१ वादनपर्य्यन्तम् आयोजिता आसीत्। अस्यां प्रतियोगितायां उत्तराखण्ड संस्कृत विश्वविद्यालय, महर्षि पाणिनि संस्कृत वैदिक विश्वविद्यालय, श्रीवेङ्कटेश्वर वैदिक विश्वविद्यालय, श्रीसोमनाथ संस्कृत विश्वविद्यालय इति चतुर्णां विश्वविद्यालयानां छात्राः भागं गृहीतवन्तः।

वादविवादस्य विषयः आसीत् – 'राज्यसमृद्धिचिन्तनं सम्यक् उताहो राष्ट्रसमृद्धिचिन्तनम्' इति। तत्र अस्माकं विश्व- विद्यालयतः ९ छात्राः नामाङ्कनं कारितवन्तः। एवमस्याः प्रतियोगितायाः निर्णायकौ स्तः – डॉ. जानकीशरणाचार्यः, डॉ. दीपेशः कतिरा महोदयश्च। अस्याः प्रतियोगितायाः संयोजिका डॉ. उमामहेश्वरी आसीत् । एवञ्च सञ्चालनं सुश्रीविदुषी बोल्लामहोदययाकारि।

4.1

## आभासीयः युवमहोत्सवः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रतिवर्षं युवमहोत्सवः आयोज्यते। अस्मिन् वर्षे कोरोनाकारणेन ओनलाइन-युवमहोत्सवः फरवरी मासस्य १८-१९ दिनाङ्कयोः समायोजितः। अस्य युवमहोत्सवस्य उद्घाटनसत्रस्य आरम्भः १८ दिनांके प्रातः १० वादने अभवत्। उद्घाटनसत्रे अध्यक्षरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, मुख्यातिथिरूपेण च कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. हरेकृष्णः शतपथी उपस्थितः आसीत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवः डॉ. दशरथ-जादवः, अनुस्नातकविभागस्य कार्यकारी अध्यक्षः डॉ. शत्रुघ्नः पाणिग्राही, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, विविधसङ्कायानाम् अध्यक्षाः अध्यापकाः कर्मचारिणः चापि अस्मिन् सत्रे उपस्थिताः आसन्।

कार्यक्रमस्य आरम्भे विश्वविद्यालयस्य छात्रः दवे नीलः मङ्गलाचरणम् अकरोत्। ततः अनुस्नातक-विभागस्य कार्यकारी अध्यक्षः डॉ. शत्रुघ्न-पाणिग्राही महानुभावानां शाब्दिकं स्वागतम् अकरोत्। डॉ. जयेश मुंगरा युवमहोत्सवस्य प्रास्ताविकं प्रास्तौत्। ततः मुख्यातिथिः प्रो. हरेकृष्णः शतपथी युवमहोत्सवस्य आयोजनं श्लाघित्वा अस्य सफलतायै अकामयत। श्रीसोमनाथसंस्कृतविश्वविद्यालयः ओनलाइन-युव-महोत्सवम् आयोजितवान् अतः भूयान् श्लाघ्यः प्रयत्नः इत्युदीर्य आयोजकेभ्यः शुभकामनाः प्रादात्।

कार्यक्रमस्य अध्यक्षः प्रो. गोपबन्धुमिश्रः मार्गदर्शकं प्रेरकं च उद्बोधनम् अकरोत्। कार्यक्रमान्ते व्याकरणविभागस्य अध्यापिका सुश्री विदुषी बोल्ला धन्यवादज्ञापनमकरोत्। सम्पूर्णसत्रस्य सञ्चालनं साहित्यविभागस्य अध्यापकः श्रीजिगरभट्टः अकरोत्। अस्मिन् युवमहोत्सवे चतस्रः स्पर्धाः आयोजिताः आसन्, वादविवादः, आशुभाषणम्, एककसंस्कृतगीतम्, सुभाषितकण्ठपाठः च। एतासु स्पर्धासु १८ महाविद्यालयानां ८७ छात्राः भागम् अगृह्णन्। एतस्य युवमहोत्सवस्य समापनसत्रम् १९ दिनाङ्के सायंकाले ४:३० वादने आयोजितम्। अस्मिन् सत्रे स्पर्धासु विजेतृणाम् उद्घोषणा कृता। प्रत्येकं स्पर्धासु विजेतारः इत्थं सन्ति -

**आशुभाषणम्**

| | | |
|---|---|---|
| तरुणः डोला | BAPS स्वा. सं.म.वि. सारङ्गपुर | प्रथमः |
| जयः दीपकभाई पुरोहितः | श्रीनारायण सं.म.वि. पेटलाद | द्वितीयः |
| दर्शनः दिनेशभाई रावलः | श्रो. भा. शिक्षाशास्त्री म.वि. सोला | तृतीयः |
| भक्तिः वासुदेवभाई पुरोहितः | स्वामिनारायण सं.म.वि. जेतलपुर | तृतीया |

**सुभाषितकण्ठपाठः**

| | | |
|---|---|---|
| निखिलः अरविन्दभाई ठाकरः | ब्रह्मर्षि सं.म.वि. नडियाद | प्रथमः |
| नीलः जगदीशभाई दवे | श्रीसोमनाथ सं.म.वि. वेरावल | द्वितीयः |
| रक्षकः विनयकुमार पण्ड्या | स्वामिनारायण सं.म.वि. इभाणा | तृतीयः |

**एककसंस्कृतगीतम्**


| | | |
|---|---|---|
| जयदेवः जिग्नेशभाई जोषी | श्री वरतन्तु सं.म.वि. सोला | प्रथमः |
| नीलः जगदीशभाई दवे | श्रीसोमनाथ सं.म.वि. वेरावल | द्वितीयः |
| मानवः विपुलभाई व्यासः | श्रो. भा. शिक्षाशास्त्री म.वि. सोला | तृतीयः |

**वादविवादः (पक्षः)**


| | | |
|---|---|---|
| कुलदीपः नवीनचन्द्रः उपाध्यायः | दर्शनम् सं.म.वि. छारोडी | प्रथमः |
| आदित्यः हसमुखभाई उपाध्यायः | ब्रह्मर्षि सं.म.वि. नडियाद | द्वितीयः |
| निकुञ्जः भानुशंकरः दवे | श्रीसोमनाथ सं.म.वि. वेरावल | द्वितीयः |
| हिमांशुः जितेन्द्रभाई जोषी | श्री वरतन्तु सं.म.वि. सोला | तृतीयः |

**वादविवादः (विपक्षः)**

| | | |
|---|---|---|
| रविः मनसुखभाई रादडिया | श्री सोमनाथ सं.वि.वि. वेरावल | प्रथमः |
| ध्रुवः पटेलः | BAPS स्वा. सं.म.वि. सारङ्गपुर | द्वितीयः |
| हितेषः कनैयालालः ठाकुरः | श्री वरतन्तु सं.म.वि. सोला | तृतीयः |



युवमहोत्सवे माननीयः कुलपतिवर्यः, निर्णायकः, संयोजकः च


युवमहोत्सवे प्रतिभागिनः

4.2



समापनसत्रे कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. श्रीनिवासः वरखेडी महोदयः मुख्यातिथित्वेन उद्बोधनम् अकरोत्। समापनसत्रे अध्यक्षत्वेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः उपस्थाय संयोजकेभ्यः विजेतृभ्यः च शुभाशीर्वचनानि प्रायच्छत्। समापनसत्रे कुलसचिवः डॉ. दशरथ-जादवः, प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, अनुस्नातकविभागाध्यक्षः, सर्वेऽपि अध्यापकाः छात्राश्च उपस्थिताः आसन्।

सम्पूर्णस्यास्य युवमहोत्सवस्य मार्गदर्शकः कुलसचिवः डॉ. दशरथजादवः, आयोजकत्वेन अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारपटेलः तथा महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, संयोजकत्वेन डॉ. जयेशः मुंगरा, डॉ. कार्तिकः पण्ड्या, श्रीरवीन्द्रकाले, श्रीजिगरभट्टः च आसीत्। स्पर्धासंयोजनमपि अध्यापकैः एव अक्रियत। एवम् अस्मिन् कोरोनाकालेऽपि परम्परानुसारं युवमहोत्सवः विश्वविद्यालयेन आचरितः।




अंक- 27, जनवरी-मार्च- 2021, पृष्ठ संख्या-16